श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ नवाधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥नवाधिकशततमः सर्गः॥

## परं धाम गन्तुं निर्गतेन श्रीरामेण सह समेषामयोध्यावासिनामपि प्रस्थानम्

प्रभातायां तु शर्वर्यां पृथुवक्षा महायशाः।
रामः कमलपत्राक्षः पुरोधसमथाब्रवीत्॥ **7.109.1** ॥

अग्निहोत्रं व्रजत्वग्रे दीप्यमानं सह द्विजैः।
वाजपेयातपत्रं च शोभमानं महापथे॥ **7.109.2** ॥

ततो वसिष्ठस्तेजस्वी सर्वं निरवशेषतः।
चकार विधिवद् धर्मं माहाप्रस्थानिकं विधिम्॥ **7.109.3** ॥

ततः सूक्ष्माम्बरधरो ब्रह्ममावर्तयन् परम्।
कुशान् गृहीत्वा पाणिभ्यां सरयूं प्रययावथ॥ **7.109.4** ॥

अव्याहरन् क्वचित् किञ्चिन्निश्चेष्टो निःसुखः पथि।
निर्जगाम गृहात् तस्माद् दीप्यमानो यथांशुमान्॥ **7.109.5** ॥

रामस्य दक्षिणे पार्श्वे सपद्मा श्रीरुपाश्रिता।
सव्येऽपि च मही देवी व्यवसायस्तथाग्रतः॥ **7.109.6** ॥

शरा नानाविधाश्चापि धनुरायत्तमुत्तमम्।
तथायुधाश्च ते सर्वे ययुः पुरुषविग्रहाः॥ **7.109.7** ॥

वेदा ब्राह्मणरूपेण गायत्री सर्वरक्षिणी।
ओङ्कारोऽथ वषट्कारः सर्वे राममनुव्रताः ॥ **7.109.8** ॥

ऋषयश्च महात्मानः सर्व एव महीसुराः।
अन्वगच्छन् महात्मानं स्वर्गद्वारमपावृतम् ॥ **7.109.9** ॥

तं यान्तमनुगच्छन्ति ह्यन्तःपुरचराः स्त्रियः।
सवृद्धबालदासीकाः सवर्षवरकिङ्कराः ॥ **7.109.10** ॥

सान्तःपुरश्च भरतः शत्रुघ्नसहितो ययौ।
रामं गतिमुपागम्य साग्निहोत्रमनुव्रताः ॥ **7.109.11** ॥

ते च सर्वे महात्मानः साग्निहोत्राः समागताः।
सपुत्रदाराः काकुत्स्थमनुजग्मुर्महामतिम् ॥ **7.109.12** ॥

मन्त्रिणो भृत्यवर्गाश्च सपुत्रपशुबान्धवाः।
सर्वे सहानुगा राममन्वगच्छन् प्रहृष्टवत् ॥ **7.109.13** ॥

ततः सर्वाः प्रकृतयो हृष्टपुष्टजनावृताः।
गच्छन्तमनुगच्छन्ति राघवं गुणरञ्जिताः ॥ **7.109.14** ॥

ततः सस्त्रीपुमांसस्ते सपक्षिपशुबान्धवाः।
राघवस्यानुगाः सर्वे हृष्टा विगतकल्मषाः ॥ **7.109.15** ॥

स्नाताः प्रमुदिताः सर्वे हृष्टपुष्टाश्च वानराः।
दृढं किलकिलाशब्दैः सर्वं राममनुव्रतम् ॥ **7.109.16** ॥

न तत्र कश्चिद् दीनो वा व्रीडितो वापि दुःखितः।
हृष्टं समुदितं सर्वं बभूव परमाद्भुतम् ॥ **7.109.17** ॥

द्रष्टुकामोऽथ निर्यान्तं रामं जानपदो जनः।
यः प्राप्तः सोऽपि दृष्ट्वैव स्वर्गायानुगतो जनः ॥ **7.109.18** ॥

ऋक्षवानररक्षांसि जनाश्च पुरवासिनः।
आगच्छन् परया भक्त्या पृष्ठतः सुसमाहिताः॥ **7.109.19** ॥

यानि भूतानि नगरेऽप्यन्तर्धानगतानि च।
राघवं तान्यनुययुः स्वर्गाय समुपस्थितम्॥ **7.109.20** ॥

यानि पश्यन्ति काकुत्स्थं स्थावराणि चराणि च।
सर्वाणि रामगमने अनुजग्मुर्हि तान्यपि॥ **7.109.21** ॥

नोच्छ्वसत् तदयोध्यायां सुसूक्ष्ममपि दृश्यते।
तिर्यग्योनिगताश्चैव सर्वे राममनुव्रताः॥ **7.109.22** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे नवाधिकशततमः सर्गः॥